## उत्सादिभ्योऽञ्। (८६/१०७८)

प्राग्दीव्यतः इत्येव। उत्सादिभ्यः[1] प्राग्दीव्यतीयेषु अर्थेषु अञ् प्रत्ययो भवति। अणस्तदपवादानां च बाधकः। औत्सः। औदपानः।

[2]उत्स। उदपान। विकर। विनोद। महानद। महानस। महाप्राण। तरुण। तलुन। 'बष्कयाऽसे' (ग. सू. ६०)। धेनु। [3]पृथिवी। पङ्क्ति। जगती। त्रिष्टुप्। अनुष्टुप्। जनपद। भरत। उशीनर। ग्रीष्म। पीलु। कुल। [4]'उदस्थानात् देशे' (ग.सू. ६१)। [5]'पृषदंशे' (ग.सू. ६२)। [6]भल्लकीय। रथन्तर। मध्यन्दिन। बृहत्। महत्। सत्त्वन्तु। सच्छब्दो मतुबन्त [7]आगतनुङ्को गृह्यते [8]सत्त्वन्तु इति। कुरु। पञ्चाल। [9]इन्द्रावसान। उष्णिक्। ककुभ्। सुवर्ण। देव[10]। 'ग्रीष्माच्छन्दसीति वक्तव्यम्' (ग. सू. ६३)। इह मा भूत्। 'ग्रैष्मी त्रिष्टुप्' (काठ.सं. १६.१८)। छन्दश्चेह वृत्तं गृह्यते, न वेदः[11]॥

## स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्। (८७/१०७९)

'धान्यानां [12]भवने क्षेत्रे खञ्' (५.२.१/१८०२) इति वक्ष्यति। तस्य प्राग् इत्यनेनैव सम्बन्धः। प्राग्भवनसंशब्दनाद् येऽर्था[13]स्तेषु स्त्रीशब्दात् पुंस्शब्दाच्च यथाक्रमं नञ्स्नञौ [14]प्रत्ययौ भवतः। स्त्रीषु भवं स्त्रैणम्। पौंस्नम्। स्त्रीणां समूहः स्त्रैणम्। पौंस्नम्। स्त्रीभ्य आगतं [15]स्त्रैणम्। पौंस्नम्। स्त्रीभ्यो हितं स्त्रैणम्। पौंस्नम्[16]। स्त्रियाः पुंवत् (६.३.३४/८३१) इति ज्ञापकाद् वत्यर्थे न भवति। योगापेक्षं च ज्ञापकम् इति स्त्रीवद् इत्यपि सिद्धम्॥

## द्विगोर्लुगनपत्ये। (८८/१०८०)

प्राग्दीव्यतः [17]इति वर्तते, न भवनात् इति। द्विगोः इति षष्ठी। द्विगोर्यः सम्बन्धी निमित्तत्वेन[18] तद्धितः प्राग्दीव्यतीयोऽपत्यप्रत्ययं वर्जयित्वा तस्य लुग्भवति। पञ्चसु कपालेषु संस्कृतः[19] पञ्चकपालः। दशकपालः। द्वौ वेदावधीते द्विवेदः। त्रिवेदः[20]। अनपत्ये इति किम्? द्वैदेवदत्तिः। [21]त्रैदेवदत्तिः। [22]प्राग्दीव्यतः [23]इत्येव, [24]द्वैपारायणिकः। [25]द्विगुनिमित्तविज्ञानादिह न भवति, पञ्चकपालस्येदं पाञ्चकपालम्[26]। अथ वा द्विगोरेवायं लुग् विधीयते। द्विगोः इति स्थानषष्ठी। ननु च प्रत्ययादर्शनस्यैषा सञ्ज्ञा? सत्यमेतत्। उपचारेण तु [27]लक्षणया [28]द्विगुनिमित्तभूतः प्रत्यय एव द्विगुः[29], तस्य लुग् भवति। द्विगुनिमित्तकोऽपि तर्हि गुणकल्पनया कस्मान् न द्विगुरुच्यते पाञ्चकपालम् इति? न तस्य द्विगुत्वं निमित्तम्। इतरस्तु [30]द्विगुत्वस्यैव निमित्तम् इत्यस्ति विशेषः।

---

1. शब्देभ्यः इत्यधिकम् क. ड. फ, प्रातिपदिकेभ्यः इत्यधिकम् इ. ह. 2. उत्स विकार निनद ब. 3. नास्ति फ. 4. उदस्थानात् पृषदंशे क. 5. उष्णत्वं पृषदंश ह. 6. भाल्लकीय क. 7. आगतनुट्को इ. ब. क. ई, आगतनुम्को ड, आगतनुट्कः परिगृह्यते ह. 8. सत्त्वन्त ब. 9. इन्द्र अपिसान ह. 10. इति उत्सादिः इत्यधिकम् ड. 11. छन्दसि इति इह न भवति ग्रैष्मी भक्तिः इत्यधिकम् ह. 12. भवनं क. 13. तत्र फ. 14. प्रत्ययौ नास्ति इ. फ. 15. स्त्रैणम् पौंस्नम् नास्ति फ. 16. स्त्रीषु जातं स्त्रैणम् पौंस्नम् इत्यधिकम् ड. 17. इत्येव फ, प्राग्दीव्यतः – तस्य लुग् भवति नास्ति ग. 18. विवक्षितः इत्यधिकम् क. ड. फ. ह. 19. पुरोडाशः इत्यधिकम् फ. 20. चतुर्वेदः इत्यधिकम् इ. क. फ. 21. नास्ति फ. 22. वाक्यमिदं नास्ति ह. 23. इत्यनेन क. 24. द्वैपारायणः क. 25. द्विगुनिमित्तत्व° ई. 26. दाशकपालम् इति इत्यधिकम् इ. क. ड. फ. ई. 27. उपलक्षणया ह. 28. द्विगुनिमित्तः फ. 29. इत्युक्तः इत्यधिकम् ई. ड. फ. 30. द्विगुस्तस्यैव क.